श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ समाख्यापद्धतिः द्वितीया ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ समाख्यापद्धतिः द्वितीया ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे विष्णुपदासक्तं तमृषिं ताञ्च पादुकाम्।
यथार्था शठजित्संज्ञा मच्चित्तविजयाद्ययोः॥ २.१ ॥

द्रमिडोपनिषन्निवेशशून्यान्
अपि लक्ष्मीरमणाय रोचयिष्यन्।
ध्रुवमाविशति स्म पादुकात्मा
शठकोपः स्वयमेव माननीयः॥ २.२ ॥

नियतं मणिपादुके ! दधानः
स मुनिस्ते शठकोप इत्यभिख्याम्।
त्वदुपाश्रितपादजातवंश-
प्रतिपत्त्यै परमाततान रूपम्॥ २.३ ॥

मुनिना मणिपादुके ! त्वया च
प्रथिताभ्यां शठकोपसंज्ञयैव।
द्वितयं सकलोपजीव्यमासीत्
प्रथमेन श्रुतिरन्यतस्तदर्थः॥ २.४ ॥

आकर्ण्य कर्णामृतमात्मवन्तो
गाथासहस्रं शठकोपसूरेः।
मञ्जुप्रणादां मणिपादुके ! त्वाम्
तदेकनामानमनुस्मरन्ति॥ २.५ ॥

यः सप्तपर्वव्यवधानतुङ्गां
शेषत्वकाष्ठामभजन्मुरारेः।

तस्यापि नामोद्वहनात् त्वयाऽसौ
    लघूकृतोऽभूच्छठकोपसूरिः॥ २.६ ॥

शय्यात्मना मधुरिपोरसि शेषभूता
    पादाश्रयेण च पुनर्द्विगुणीकृतं तत्।
भूयोऽपि भागवतशेषतया तदेव
    व्यङ्क्तुं पदावनि ! शठारिपदं बिभर्षि॥ २.७ ॥

पद्येन देवि ! शठकोपमुनिस्तवासीत्
    तस्यापि नामवहनान्मणिपादुके ! त्वम्।
शेषी बभूव युवयोरपि शेषशायी
    शेषं त्वशेषमपि शेषपदे स्थितं वः॥ २.८ ॥

विन्ध्यस्तम्भादविहतगतेर्विष्वगाचान्तसिन्धोः
    कुम्भीसूनोरसुरकबलग्रासिनः स्वैरभाषा।
नित्यं जाता शठरिपुतनोर्निष्पतन्ती मुखात्ते
    प्राचीनानां श्रुतिपरिषदां पादुके ! पूर्वगण्या॥ २.९ ॥

शठकोप इति समाख्या तव रङ्गधुरीणपादुके ! युक्ता।
सूते सहस्रमेवं सूक्तीः स्वयमेव यन्मया भवती॥ २.१० ॥

॥ इति श्रीपादुकासहस्रे समाख्यापद्धतिः द्वितीया ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥